# SS-I/1/22SSS1CCTC1/23

**प्रथमसत्रार्द्धः**

**प्रथमपत्रम्**

**दर्शनसमाजशास्त्रयोः परिप्रेक्ष्ये शिक्षा**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. शिक्षायाः अर्थं विलिख्य परिभाषात्रयं लिखत।
2. शिक्षायाः पञ्चाभिकरणानि परिचिनुत।
3. प्रयोजनवादं स्पष्टयत।
4. अन्यथासक्षमाणां शैक्षिकावसरान् विशदयत।
5. शिक्षायाः समाजशास्त्रीयाधारान् स्पष्टयत।
6. प्रजातन्त्रात्मकशिक्षायाः स्वरूपं निरूपयत।
7. प्लेटोवर्यस्य शिक्षादर्शनं संक्षिप्ततया लिखत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. महिलाभ्यः प्रकल्पितशैक्षिकावसरान् विमृशत।
9. भारतीयदर्शनसम्प्रत्ययं स्पष्टयत।
10. आदर्शवादं स्पष्टीकृत्य शिक्षायां तस्यानुप्रयोगान् सोदाहरणं विशदयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. भारतीयसंविधानस्य परिचयं दत्वा शिक्षाधिकारान् विश्लेषयत।
12. स्वामिदयानन्दस्य शिक्षादर्शनं स्पष्टीकुरुत।

# SS-I/2/22SSS1CCTC2/23

**प्रथमसत्रार्द्धः**

**द्वितीयपत्रम्**

**अधिगमविकासयोः मनोविज्ञानम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. शिक्षामनोविज्ञानस्य उद्देश्यानि कानि?
2. अधिगमस्थानान्तरणं वर्णयत।
3. व्यक्तित्वस्याभिज्ञाने प्रक्षेप–प्रक्षेपेतरप्रविधयः के? स्पष्टयत।
4. वैयक्तिकभिन्नतायाः कारणानि कानि?
5. अभिवृद्धि–विकासयोः प्रभावोत्पादकानि कारणानि कानि?
6. उपचारात्मकविधिं स्पष्टयत।
7. बुद्धेः प्रकारान् सोदाहरणं वर्णयत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. पावलॉवमहोदयस्य शास्त्रीयानुबन्धनसिद्धान्तं प्रतिपाद्य तस्य शैक्षिकानुप्रयोगान् सोदाहरणं विशदयत।
9. अभिप्रेरणाचक्रम्, अभिप्रेरणायाः प्रकारान् च विशदेन वर्णयत।
10. बुद्धेः संरचना–सिद्धान्तं प्रतिपाद्य, भाषाशिक्षकाणां कृते अस्य सिद्धान्तस्य महत्त्वं स्पष्टयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. विकासस्य स्वरूपं विलिख्य शारीरिक–मानसिक–सांवेगिक–सामाजिकविकाससन्दर्भे वंशानुक्रमस्य प्रभावं वर्णयत।
12. व्यक्तित्वस्य निर्धारकतत्त्वानि कानि वर्तन्ते इति विलिख्य व्यक्तित्वसिद्धान्तान् विस्तरेण प्रतिपदयत।

# SS-I/3/22SSS1CCTC3/23

**प्रथमसत्रार्द्धः**

**तृतीयपत्रम्**

**शिक्षणाधिगमयोः शैक्षिकप्रविधिः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. शैक्षिकप्रविधेः उद्देश्यानि विलिख्य तदुपयोगितां प्रतिपादयत।
2. शिक्षणस्य स्तराः निरूपणीयाः।
3. उत्तमसम्प्रेषणस्य सिद्धान्ताः के? वर्णयत।
4. दलशिक्षणस्य कः अभिप्रायः? स्पष्टयत।
5. सौविध्यकर्तृरूपेण शिक्षणाधिगमप्रक्रियायाम् अध्यापकस्य भूमिकां लिखत।
6. अधिगमस्य एकां परिभाषां विलिख्य अधिगमप्रक्रियां प्रतिपादयत।
7. ई–संसाधनं किं भवति? कस्यचित् एकस्य ई–संसाधनस्य वर्णनं कुरुत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. शैक्षिकप्रविधेः उपागमानां वर्णनं कुरुत।
9. अधिगमस्य उद्दीपक–अनुक्रिया–सिद्धान्तं स्पष्टीकुरुत।
10. सम्प्रेषणे बाधाः तासां निवारणोपायान् च प्रतिपादयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. सूक्ष्मशिक्षणस्य विशदा निरूपणं विधाय एकं शिक्षणकौशलं वर्णयत।
12. अभिक्रमिताधिगमस्य अर्थम् आवश्यकतां च निरूप्य तत्प्रकारान् प्रतिपादयत।

# SS-I/4/22SSS1CCTC4/23

**प्रथमसत्रार्द्धः**

**चतुर्थपत्रम्**

**भाषाशिक्षा**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. भाषायाः कोऽर्थः इति लिखत।
2. अधिगमे भाषायाः केन्द्रीकरणं कथं सञ्जायते?
3. भाषायाः विकासं संक्षिप्तेन स्पष्टयत।
4. भाषायाः प्रकृतिः कीदृशी भवतीति वर्णयत।
5. भाषाविज्ञानस्य प्रासङ्गिकतां लिखत।
6. गृहभाषात्वेन संस्कृतस्य किं महत्त्वम्?
7. विविधभाषापरिवाराः के सन्ति? रेखाचित्रेण स्पष्टयत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. भाषाध्ययनं किमर्थम् आवश्यकमिति विमर्शयत।
9. बहुभाषीयकक्षायाः सम्प्रत्ययं उद्देश्यानि च स्पष्टयत।
10. भाषाविज्ञानस्य अर्थं विलिख्य तस्य अङ्गानि विशदयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. भारते संस्कृतभाषायाः स्थितिं विस्तृतरूपेण वर्णयत।
12. 2020 राष्ट्रियशिक्षानीतौ संस्कृतस्य महत्त्वं प्रतिपादयत।

# SS-I/5/22SSS1CCTC5/23

**प्रथमसत्रार्द्धः**

**पञ्चमपत्रम्**

**शैक्षिकप्रबन्धनम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. शैक्षिकप्रबन्धनस्य सम्प्रत्ययं परिभाषां च लिखत।
2. शैक्षिकप्रबन्धनस्य प्रमुखानि उद्देश्यानि लिखत।
3. प्रधानशिक्षकस्य विशेषताः काः? वर्णयत।
4. समयसारिण्याः सम्प्रत्ययं प्रतिपादयत।
5. शैक्षिकप्रबन्धस्य आवश्यकताः काः? प्रदर्शयत।
6. विद्यालयोपस्करणानि कानि? प्रतिपादयत।
7. विद्यालयसमयसारणी–कक्ष्यासमयसारणी इत्यनयोः भेदं स्पष्टयत।

**खण्डः – ख**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. कक्ष्याशिक्षणे शिक्षकस्य कर्तव्यानि उत्तरदायित्वानि च विवृणुत।
9. विद्यालयभवनस्य प्रारूपं तत्प्रकारान् च स्पष्टयत।
10. शैक्षिकप्रबन्धनस्य सिद्धान्तान् सविस्तरं वर्णयत।

**खण्डः – ग**

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. पाठ्यसहगामिक्रियाणां महत्त्वं प्रतिपाद्य तस्यां शिक्षकस्य भूमिका का इति लिखत।
12. भौतिकसंसाधनानां परिचयं प्रदाय विद्यालयेषु पुस्तकालयस्य संरचना कथं भवेदिति स्पष्टयत।